जालकं, क्ली, ( जल संवरणे+भावे घञ् । जालेन ईषदावरणेन कायति प्रकाशते इति । कै+कः । जाल+स्वार्थे कन् वा ।) अस्फुटकलिका । इति भरतः ॥ ( यथा, मेघदूते । ९९ ।
"तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम् ॥")
कुष्माण्डादिशुष्कफलम् । इति सारसुन्दरी ॥ तत्पर्य्यायः । चारकः २ । इत्यमरः । २ । ४ । १६ ॥ कोरकः । दम्भः । कुलायः । आनायः । इति मेदिनी । के, ६२ ॥ ( यथा, सुश्रुते । उत्तरतन्त्रे ७ अध्याये ।
"दृष्टिर्भृशं विह्वलति द्वितीयं पटलं गते ।
मक्षिकान् मशकान् केशान् जालकानि च पश्यति ॥")
समूहः । इति शब्दरत्नावली ॥ (यथा, शाकुन्तले प्रथमाङ्के ।
"बद्धं कर्णशिरीषरोधि वदने घर्म्माम्भसां जालकं बन्धे स्रंसिनि चैकहस्तयमिताः पर्य्याकुला मूर्द्धजाः ॥"
वंशलौहादिनिर्म्मितजालाकृतिद्रव्यविशेषः । यथा, पञ्चतन्त्रे । ३ । १७ । ८ ।
"ततो यष्टिं शलाकाश्च जालकं पञ्जरं तथा ।
बभञ्ज लुब्धको दीनां कपोतीञ्च मुमोच ताम् ॥")
जालकं, क्ली स्त्री, ( जल संवरणे+भावे घञ् । जालेन आवरणेन कायति प्रकाशते इति । कै+कः ।) मोचकफलम् । इति मेदिनी ॥ के, ६२ ॥
जालकः, पुं, ( जालेन वंशलौहादिनिर्म्मितजालाकृतिद्रव्यविशेषेण कायतीति । कै+कः । ) गवाक्षः । इति हेमचन्द्रः । ४ । ७८ ॥
जालकारकः, पुं, ( जालं करोतीति । कृ+ण्वुल् । जालस्य कारको वा । ) मर्कटकः । इति हेमचन्द्रः । ४ । २७६ ॥ जालकर्त्तरि, त्रि ॥
जालकिनी, स्त्री, ( जालकं लोमसमूहस्तदस्त्यस्या इति । "अत इनिठनौ ।" ५।२।११५। इति इनिस्ततो ङीप् । ) मेषी । इति हेमचन्द्रः ।४।३।४३॥
जालगर्द्दभः, पुं, रोगविशेषः । तस्य लक्षणं यथा,
"विसर्पवत् सर्पति यः शोथस्तनुरपाकवान् ।
दाहज्वरकरः पित्तात् स ज्ञेयो जालगर्द्दभः ॥"
अपाकवान् ईषत्पाकवान् । पित्तसत्त्वेन सर्व्वथा पाकाभावस्यायुक्तत्वात् । अयमशिवात इति ख्यातः ॥*॥ अथ चक्तेन्द्रवृद्धागर्द्दभिकाजालगर्द्दभानां चिकित्सा ।
"विहितामिन्द्रवृद्धाञ्च गर्द्दभीं जालगर्द्दभम् ।
पैत्तिकस्य विसर्पस्य क्रियया साधयेद्भिषक् ।
पाके तु रोपयेदाज्यैः पक्वैर्म्मधुरभेषजैः ॥"
इति भावप्रकाशः ॥
जालगोणिका, स्त्री, ( जालवत् गोण्या छिद्रवस्त्रेण कायतीति । कै+कः । ततो ह्रस्वः । ) दधिमन्थनभाण्डविशेषः । तत्पर्य्यायः । कण्डोलः २ । इति शब्दरत्नावली ॥
जालन्धरः, पुं, त्रिगर्त्तदेशः । इति हेमचन्द्रः । ४ । १४ ॥ (देशोऽयं पीठस्थानानामन्यतमः । अत्र भगवती विश्वमुखीमूर्त्त्या विराजते । यथा, देवीभागवते । ७ । ३० । ७६ ।
"जालन्धरे विश्वमुखी तारा किष्किन्धपर्व्वते ॥"
जालन्धरोऽभिजन एषामिति । अण् । ) तद्देशस्थे पुं भूम्नि । ( दैत्यविशेषः । यथा, काशीखण्डे । २१ । १० ।
"पुरा जालन्धरं दैत्यं ममापि परिकम्पनम् ।
पादाङ्गुष्ठाग्ररेखोत्थं चक्रं सृष्ट्वा हरोऽहरत् ॥"
ऋषिविशेषः । इति व्याकरणम् ॥)
जालपात् [ द् ] पुं, ( जालमिव पादौ यस्य । ) हंसः । इति त्रिकाण्डशेषः ॥ (यथाह सम्वर्त्तः । १४६ ।
"टिट्टिभं जालपादञ्च कोकिलं कुक्कुटं तथा ॥")
जालप्राया, स्त्री, ( जालस्य प्रायो बाहुल्यं यत्र । ) अङ्गरक्षिणी । इति हेमचन्द्रः । ३ । ४३३ ॥ लोहार साँजोया इति भाषा ॥
जालवर्ब्बूरकः, पुं, (जालाकारो वर्ब्बूरकः । शाकपार्थिवादिवत् समासः । ) वर्ब्बूरवृक्षविशेषः । तत्पर्य्यायः । छत्राकः २ स्थूलकण्टकः ३ सूक्ष्मशाखः ४ तनुच्छायः ५ रन्ध्रकण्टः ६ । अस्य गुणाः । रूक्षत्वम् । वातामयकफनाशित्वम् । पित्तदाहकारित्वम् । कषायत्वम् । उष्णत्वञ्च । इति राजनिर्घण्टः ॥
जालिकः, पुं, (जालेन जीवतीति । जाल+"वेतनादिभ्यो जीवति ।" ४ । ४ । १२ । इति ठन् । यद्वा, जालेन चरतीति । "पर्पादिभ्यः ष्ठन् ।" ४ । ४ । १० । इति ठन् । ) कैवर्त्तः । इति त्रिकाण्डशेषः ॥ वागुरिकः । जालेन मृगबन्धनकर्त्ता इत्यमरः । २ । १० । १४ ॥ मर्कटकः । इति हेमचन्द्रः । ४ । २७७ ॥ ( ऐन्द्रजालिकः । इति शाकरणम् ॥ )
जालिकः, त्रि, (जालेन जीवतीति । जाल+ठन् ।) ग्रामजाली । जालोपजीवी । इति मेदिनी ।के,६४॥
जालिका, स्त्री, ( जालं जालवदाकृतिरस्ति अस्याः । जाल+"अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् । ) वस्त्रविशेषः । गिरिसारः । ( जलमेवेति स्वार्थे अण् । ततो जालं सलिलं उत्पत्तिलेनास्त्यस्या इति ठन् । ) जलौका । विधवा । भटानामश्मरक्षिताङ्गरक्षिणी । इति मेदिनी । के, ६४ ॥
जालिनी, स्त्री, ( जालं चित्रकर्म्मवस्तुसमूहो विद्यतेऽस्यामिति । इनिस्ततो ङीप् । ) चित्रशाला । इति हेमचन्द्रः । ४ । ६५ ॥ ( जालं आनायसदृशद्रव्यं विद्यतेऽस्या इति । ) कोशातकी । इति राजनिर्घण्टः ॥ ( यथास्याः पर्य्याया भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।
"धामार्गवः पीतपुष्पी जालिनी कृतवेधना ।
राजकोशातकी चेति तथोक्ता राजिमत्फला ॥"
घोषातकी । इति रत्नमाला ॥ प्रमेहरोगिणः पीड़काविशेषः । यथा, सुश्रुते निदानस्थाने ६ अध्याये । "तत्र वसामेदोभ्यामभिपन्नशरीरस्य त्रिभिर्दोषैरनुगतधातोः प्रमेहिणो दश पीड़का जायन्ते । तद्यथा, शराविका सर्षपिका कच्छपिका जालिनी विनता पुत्रिणी मसूरिका अलजी विदारिका विद्रधिका चेति ।"
"जालिनी तीव्रदाहा तु मांसजालसमावृता ॥")
जाली, स्त्री, ( जालं जालाकृतिरस्ति अस्याः अच् ततो गौरादित्वात् ङीष् । ) ज्योत्स्नी । इत्यमरः । २ । ४ । ११८ ॥ झिङ्गा । इति ख्याता । पटोलः । इति राजनिर्घण्टः ॥
जाल्मः, त्रि, ( जालयति दूरीकरोति हिताहितज्ञानमिति । जल+णिच्+बाहुलकात् मः ।) पामरः । ( यदुक्तम् ।
"क्षणं विश्राम्यतां जाल्म ! स्कन्धं ते यदि बाधति ।
न तथा बाधते स्कन्धं यथा बाधति बाधते ॥")
क्रूरः । असमीक्ष्यकारी । इति मेदिनी । मे. १३ ॥ ( यथा, माघे । १५ । ३३ ।
"त्वयि पूजनं जगति जाल्म !
कृतमिदमपाकृते गुणैः ।
हासकरमघटते नितरां
शिरसीव कङ्कतमपेतमूर्द्धजे ॥")
जाषकं, क्ली, ( जसति मुञ्चति बहुगन्धादिकमिति । जस+ण्वुल् । पृषोदरादित्वात् सस्य षत्वम् । ) कालीयकनामगन्धद्रव्यम् । इत्यमरटीकासारसुन्दरी ॥
जाहकः, पुं, घोङ्घः । घोंघ इति भाषा । मार्ज्जारः । खट्टा । कालखञ्जिका । इति मेदिनी । के, ६२ ॥ विलेशयजन्तुविशेषः । तत्पर्य्यायः । गात्रसङ्कोची २ मण्डली ३ बहुरूपकः ४ कामरूपी ५ विरूपी ६ विलवासः ७ । इति राजनिर्घण्टः ॥
जाह्नवी, स्त्री, ( जह्नोरपत्यं स्त्री । जह्नु+अण्+ङीप् । ) गङ्गा । इति हेमचन्द्रः । ४ । १४७ ॥ एतन्नामकारणं यथा,—
"जाह्नुद्वारा पुरा दत्ता जह्नुः संपीय कोपतः ।
तस्य कन्यास्वरूपा च जाह्नवी तेन कीर्त्तिता ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥ * ॥
तस्यां तिथिविशेषे स्नानफलं यथा,—
"सामान्यदिवसस्नानसङ्कल्पं शृणु सुन्दरि ! ।
पुण्यं दशगुणञ्चैव मौषलस्नानतः परम् ॥
ततस्त्रिंशद्गुणं पुण्यं रविसंक्रमणे दिने ।
अमायाश्चापि तत्तुल्यं द्विगुणं दक्षिणायने ॥
ततो दशगुणं पुण्यं नराणामुत्तरायणे ।
चातुर्म्मास्यां पौर्णमास्यामनन्तं पुण्यमेव च ॥
अक्षयायाश्च तत्तुल्यं नैतद्वेदनिरूपितम् ।
असंख्यपुण्यफलदमेतेषु स्नानदानकम् ।
सामान्यदिवसस्नानात् दानात् शतगुणं भवेत् ॥
मन्वन्तरायां देवेशि ! युगाद्यायां तथैव च ।
माघस्य सितसप्तम्यां भीष्माष्टम्यां तथैव च ॥
ततोऽपि द्विगुणं पुण्यं नन्दायां भवदुर्ल्लभे ! ।
दशहरादशम्याश्च युगादादि समं फलम् ॥
नन्दासमञ्च वारुण्यां महत्पूर्ब्बे चतुर्गुणम् ।
ततश्चतुर्गुणं पुण्यं द्विमहत्पूर्ब्बके सति ॥
पुण्यं कोटिगुणञ्चैव सामान्यस्नानतो हि यत् ।